
मार्गिव चंद्रु

श्रीगणेशायनमः॥ ॥श्रीपतींप्रणमद्दारकृद्दाभिनंदनं॥भवबंधछिदंवंद्यंवंदेमांद्यनिरंजने॥१॥देवःशारदपद्म कोरकमदध्वंसिपद्माकुचभाग्भारस्फुटच्चारुपत्ररचनाचातुर्यरत्नाकरः॥लक्ष्मीनेत्रकटाक्षवीक्षणलक्षीकृतः क्षिप्रंपक्षिपतिध्वजोविनतुतांशास्त्रंप्रशास्तंमम॥२॥निर्निमेषपदाब्जेसंविशंतिवनेचमी॥गुणजालयुताःसंतोधीवरादृनिमेमतिः॥३॥मानससंचारिपदासारसिकप्रियगुणासुवर्णवनी॥सल्लतिरपिकाकैःकिंकलहंसीवसदाप्रदुष्यतेकुजनैः॥४॥तत्रनव्यालंकृतिहंसवर्णस्फुर्त्यासाध्वीनामलतिःकेयंनूनमनल्पदूषणपदंस्यादेवकिंतावना॥ संतःसंतिमदाश्रयास्मरणीसंचारिणःप्रस्फुरद्दोषास्तेपिगुणाःसुरंबुदमुखैरंभांमिसिंधोरिव॥५॥अस्तिचचतुःसमुद्रवलयमध्यगतमंकलवस्कंधरग्वेदमंडनं॥खर्वीकृतशर्वागिरर्वपर्वतैर्विनिर्जितकोपाटोपैःस्फुरज्जटामुकुटविराजितोत्तमांगैः॥पुरंदरादिवंदितवंद्यस्फुरदमुकुंदपदारविंदमकरंदषट्पदैः॥अविरतनित्यानित्यवस्तुविचारपरवशैर्मुनिजनैर्जनि॥सारिकासारसहंसशुकचक्रवाककेकिपरपुष्टकंठध्वनिभिःपांथानाह्वयदिवातिरमणीयतमसनप्रदेशं॥कस्तूरिहरिणवाराहसमुत्तुंगमतंगगवयकृष्णमृगपंचाननप्रभृतिभिर्वनचरैरप्यन्योन्यभवनपरैःपशुभिरधिष्ठितं॥अधरीकृतनंदनवनरामणीयकं॥निजविमलकीलालबहुलकल्लोलकल्लोलोच्छलनल्लुलितनरतुषारपयोधिवितानविलजीवराशेरजनाभखंडस्फुटकीर्तिकेतुयष्टेः॥स्नानार्थागतकिन्नरीगणनिर्धौतस्तनकुंकुमपंकांकितोत्तुंगतरंगवत्याभगवत्याःसरस्वत्यास्तीरं॥यत्रपरोपकारार्थंजन्मानोनेकशाखिनःकमनीयपरिछदाःफेनपाइवपादपाःसंति॥यत्रचलताःसर्वर्तुपुष्पवत्योपिअप्रदोषविकाशिन्यो मुनिनिचयावचितकुसुमाःसंति॥चूताश्वत्थकपित्थकुंदतिलकंकोल्लासंतानकैर्बिल्वानीलतमालतालतमनसमोन्नप्रियालैर्गुदैः॥खर्जूरार्जुनभूर्जलोध्रबकुलैराम्रातकाद्यैरपिव्याप्तंतद्दरभूरिभूरुहचरैर्दैवैर्यथाविष्टपं॥६॥अपिच॥बहुलशकुनिविपुलार्जुनमभिनसकृपक्षीक्षहरिशतदुपदं॥सकबहुशिरवंडिसमधिकंभारतचरितात्सरस्वतीतीरं॥७॥नूनमीर्ष्याभारादिवतयेवभगवत्यासरस्वत्या॥अमरपुरसमृध्यिस्पर्धयावर्धयित्वानिजरुचिरतटांकप्रांतसौभाग्यभाग्यं॥तदनुभवसमोद्दस्तपक्षाबांसमूहैःसचजनिकरसंपद्यस्पृहःसस्पृहोपि॥८॥कदाचित्तत्रनिगमाध्ययनचयनादिपजनदस्तावधानाःविषविषमविषयाविषक्तास्तिवेकंग्राम्यजनानुग्राहकाः॥निखिलनिगमार्थपारदृश्वानः॥यशीकृतकरणांतःकरणानरिश्वानः॥भूरियज्वानस्तपस्विनोवनेरुः॥येषामतिचित्रतमंचरित्रं॥भवेरतानप्यभवाश्चकेचिद्रमापमक्षाअपिनोणः॥हिरण्यगर्भोपस्तातस्तथापिहिरण्यगर्भोस्मनतेहिजार्याः॥९॥संसारतापसंशांत्यैनयोभिस्तेतपस्विनः॥चित्रंसततमर्चंतिश्रीवरंजनतापदं॥१०॥अवनीयसरस्वतीतीरवीरुन्नरुणतरुसमुन्निद्रसांद्रकुसमसमूहोद्गमद्भमरपुंजमंजुसिंजनप्रणुन्नाइवस्वयमपितत्तटपाविश्रद्धतचित्तासत्रार्थमंचयामासुः॥इतोभूमीरम्यामितमृगपटांकैरतिनरामितोदर्भाःशश्वद्धरितइहनीवारपटलं॥इतोवातःसारस्वतजलकणान्मूर्छतिवहन्पिकःप्रोद्यैरम्यमकसमयमावेदयतियः॥११॥अपिचास्माकं॥यज्ञसंसारमोक्ष्याद्दिलुभ्यन्मनसामिह॥इतिमुत्साहयत्येतन्नीरंसारस्वतंकृतौ॥१२॥तद्युच्यतेत्रयज्ञेनयज्ञभागभुजःसुधाभुजःसनाजयितुमिति॥ततः॥युक्तमित्येवतस्वैष्यनुमान्यसमुत्सुकाः॥समग्रांसत्रसामग्रींकृत्यांचक्रुर्जसा॥१३॥अनंतरंकणादिनाभूसुधिंविधायविरचितश्च॥नतच्चिन्हवदुन्नतोन्नतचतुर्द्वारःसुधारंजिनःप्रत्यग्रस्फुरदाम्रपल्लवभरकूत्कोलसत्तोरणः॥सधूपैरभिशोभितश्चनगमध्यानेकशालीक्षुभाग्वंशाःकुशनिर्मितास्तरणवान्रम्यःकृतोमेडपाः॥१४॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अग्निशालामोचगार्हपत्याहवनीयादीनांशरणानिमेखलाभिरुपशोभितानिविरचय्य॥ततः॥स्नात्वाथसलिलेहृद्येसर चं॰
स्वत्यामुनिसृताः॥कृतजप्याश्चनेविप्रायज्ञवाटमुपागमन्॥१५॥प्रविश्यतस्मिन्निशालेपिसशालेमंडपेप्रागग्रेषुदर्भेषू
पविष्टाःप्रविभक्तकर्माधिकारामुनयोमहतापुण्याहघोषेणदीक्षांप्रवर्तयामासुः॥१॥॥तत्रप्रथमंमुख्यदेवतोद्देशेनकि
यमाणेसंकल्पेविकल्पस्तेषामंतःकरणसदनंमदमत्तमातंगदुर्वोद्यशिलोद्यदरीमध्यमध्यनिष्टत्॥हरिहरविधयः॥
जगतामीश्वरत्वेनत्रयःपूज्यास्तथाप्ययं॥नरःकस्यानुसरणादत्यंतंक्षेममश्नुते॥१६॥इति॥तथाविधेव्यतिकरे॥हिर
ण्यगर्भोपासकाःप्रोचुः॥अहोकथमेवंपंडिताअपिहस्तस्थितवस्तुवीक्षणलुब्धदर्पणापेक्षावंतंपंथानमनुस्मरंति॥
यतःस्पष्टमेवैतत्॥येनस्वयेनधात्माज्वलदनलचलज्वालमालागरिम्णापुष्टेनेष्टेःतपोभिर्लब्धसमयतमस्तोमस्ती
ढातराणां॥नृणांपूर्णात्मबोधभ्रमदमविदुषांदृष्टिरुन्मीलिताद्राक्सृष्टव्यःसृष्टिनाथःसतुसततमतःसर्ववेदैकस
पं॰ र्वः॥१७॥तदुत्तरंसानुशेषोवाः॥यदंघ्रिप्रेक्षार्थागतमुदितदेवारकजनप्रभाचक्रभ्राजन्मुकुटतटसंघट्टगलितैः॥स्फु
रद्रत्नैर्निर्यज्जनितसिकतंमांगणमहोयदीयंतंदेवंभवमिहभजामस्सुरवरं॥१८॥तदूर्ध्वंभागवताः॥योनेत्रश्रुतिभा
रतीप्रभृतिभिर्विज्ञायतेमोगुणैर्यश्चाम्नायसमूहशास्त्रनिपरैस्तत्सर्वदृत्योच्यते॥संघप्राधानिकंप्रविष्टइवयःसं
नां॰ भाव्यतेस्वेछयाभक्तेभ्यश्चभवायभावितनुःसेव्योहरिःसर्वदा॥१९॥इत्यायहुंस्वग्रहग्रहोग्रस्तांतरात्मानोमहा
त्मानःस्वस्वोपासनवासनापरवशत्वेनपरस्परंनिजगदुः॥ततःकेचित्कविचारशीलनपराः॥आःकिमेतेनाविचा
रचतुरेणभवतांविचारेण॥एतन्निश्चम्यैवंवादयःसर्वेप्येकीभूताः॥कथमविचारचतुरत्वमस्मद्विवादस्य॥
यतोब्रह्मादिदेवतानां॥तिसृणामपिभूरिभाग्यभाजांजगदीशमयंजगादवेदः॥स्मृतयश्चततोवयंप्रपन्नाःशर ॥२॥
णंतच्चरणानघापहस्ये॥२०॥विवेकिनः॥सत्यमुक्तंतथापि॥यथा॥दीपानामरुणश्चितादिकाचसारेःकृष्णेषुस्फु

टचंपकेषुसंश्लिष्टानां॥दीपत्वंयद्यपिसमंतथापिकांतिःश्वेतस्थेबहुकृतमातमांसिहंति॥२१॥एवमेवनिगमस्कृतपद
नीरजानांतनुपाधिकृतवैषम्यजुषांतेषामीश्वरत्वाविशेषेपियतस्तूर्णमर्णवसारेसंसारेनिमज्जतांजन्मिनामज्ञाननिष्ट
तिद्वारातत्स्वरूपसंप्राप्तिफलमंजसाभविष्यतीतिविज्ञानार्थंकश्चिदूतंप्रेषितव्यः॥ततःसर्वेप्येकमत्यमनुसृत्यकोवैप्रेषितव्यः
कश्चकार्यक्षमइतिवितर्कयामासुः॥विचार्यवधैर्यचातुर्यादिचर्यायत्कर्मविधातृपुत्रंभृशुंतद्योग्यमत्वातंमत्यूचुः॥भृगोया
हिप्रंप्रथितगुणशालीसकरुणोभवाब्धेरंतंकाचरणशरणोत्तारणपरः॥जगत्त्रन्मत्राणप्रशमनविलासेषयमिति
त्रिषुज्ञात्वैहित्वंमुनिनिचयमोदायझटिति॥२२॥सइत्यमाकर्णितमुनिजनवचनोभृगुःस्वचित्तेऽचिंतयत्॥अहोकिमेतच्छ
लमाश्रयमिदंकार्यमांप्रत्यपदिशंति॥नायंहितोपदेशः॥नहित्यजेदेकंकुलस्यार्थेइतिज्ञायेनसर्वेषिमहदवज्ञांधकू
पेमांप्रतिप्रवेशयंति॥तदिदमकार्यमनार्यसममित्यवधार्यप्रावोचत्॥कथंजगत्पूज्यपदेषुशाश्वच्छलप्रयोक्ताभवितास
मृषः॥जिज्ञाविषुःप्राणहरंनिगर्यक्रूरंगरंकोहिभवेत्कृतार्थः॥२३॥एतन्निश्चम्यमुनयः॥नत्वमीशानांछलमकार्यं
कृत्वापिपापभाक्कृयनःस्वार्थार्थंनमहृत्तः॥सर्वलोकशंकापरिहारेणपरोपकारार्थं॥अकार्यकारिणोपिपरोपकारि
णोनदुष्यंते॥शृणुतावत्॥सशंभोरंभोधिप्रभवमभिपातुंपशुपतेर्विषंकिंव्यापारोजगतिकथयस्वास्कृतिपदं॥सु
समर्थं तस्त्वाक्षुब्धपूर्णाप्रमथनविधातुःसुरपतेःसौभाग्यंवितरतिपरेषामुपकृते॥२४॥तस्मात्परोपकारार्थमकार्यप्रवृत्तिरपि
नदूषणार्हाप्रस्कृताभीप्सितेष्टमपिफलतोनिपश्य॥संभावंवतकर्दमादिभिरलंकष्टात्कलत्रंहरेस्कृष्टादेकमथा
च्युतेनधरणीजन्मानमुन्मथ्नता॥आदित्यार्थकरेणसार्धमयुतंतेषांसहस्राधिकंलब्धंकोत्यसमीहितेष्टफलकोलो
कोपकारंविना॥२५॥तस्मात्तत्तमप्यनयालोकोपकृतिप्रवृत्त्यापिभविष्यसिप्रशंसापात्रमित्युक्तातूष्णींस्थितेषुमहर्षि

षु॥अथपरिहृतशंकानंकमंकेमुनीनांमनुनयपदुवाचावाचमुचैर्निशम्य॥तदुदितनयवर्त्मन्यर्पितात्मार्यशंतः सरभसमभिगंतुंब्याहृतोभूतदर्थं॥२६॥ ॥इतिभार्गवचंद्रोप्रथमस्तबकः॥ ॥अथांतरेप्रभूततमस्विनीतमस्तोमसंभूतजननयनोपरोधसंहारैकचतुरकरःसहस्रकरःसमतिक्रम्यप्राचीमुखाभ्रभःसरणिंस्वकरपरामृष्टारुणादिगंबरःकामुकइवनैरस्तात्तविशालमौलिमनुससार॥आश्चर्यमिदं॥पुंसांपांसूद्दंशुमानयमहोनिर्दोषरागामिसामानार्हामपिपद्मिनींस्वरमणिंत्यक्त्वाप्रतीच्यांरतः॥तत्संगायतदंबरंपरिमृशन्दोर्भिर्प्रयात्यद्यतःकष्टंधाम्नवतोपितस्यचरितंजारापराधस्तकः॥३॥चक्रवालेनिजकरनिकरैःसंप्रशास्यप्रचंडैश्चानुर्वर्ण्यंचत्तत्तत्कविहितकरणेयोजयित्वाव्यलीकं॥प्रातेकालेथपश्चात्सपदिपुनरयंदीपसंक्रामितश्रीरस्तंप्रत्येतिक्लांतहृदिनकरःकोकलोकंसशोकं॥२॥अभ्युदयेभवतिनरःपूज्योनविनाशकालइतिसित्थं॥अद्भुतमिदंयदर्घ्यैरुदयेस्तमनेपिपूज्यतेभास्वान्॥३॥इतिकौतूहलाद्नेकविधंतर्किनवस्तुजनेषु॥अस्तंगतवतिभगवत्यंशुमति॥अतिबहलतमतमस्तोमसंपूरितांतरालोभुवनगोलकोयंरत्नंजनकरंडकइवसंहृतः॥अथवा॥निजकरपरिमर्शोद्भूतनूतनप्रमोदप्रसरंमनुरंजद्दारुणीसंगसक्तः॥रविरसितपटेनव्याहृणोद्द्रुतकामोभुवनमिवसलज्जस्तंधकारच्छलेन॥४॥ततः॥स्फूर्जद्तरमस्तरोच्चयकंदराधिष्ठितेषुवनचरसमूहेषु॥भयादिवसंचरत्सूपवनतरुकोटरांतरालंविहंगेषु॥सभद्रत्सचकाककुलस्पर्धोधीकृतदिवांधेषु॥मानवतीष्विवमुकुलितासुकमलिनीषुप्रियविरहविद्रूयमानमानसेषुकोकलोकेषु॥प्रोद्यद्व्यथौवनमदात्समांगनांगरंगेषुरंतुकामेरंगोपजीविनीवशगैःसंचरतिभगवतिमकरध्वजे॥समसमसंभुसंदीप्तसप्तजिह्वप्रहाहिते॥ननुसिप्रोद्यताःकिनुस्फोटकाइवतारकाः॥५॥अपिच॥भास्वत्कराग्निसंदग्धनभोभस्मेचमेचकं॥यास्तस्मिन्विस्फुरन्तारास्ताहुताशकणाइव॥६॥अथवा॥ध्वांतस्यांतायगच्छन्नथविरहवतींप्राणिदंशंप्रेक्ष्यदत्तासू ॥३॥

र्यीधुर्यंस्वहस्तादृतगगनसरस्तारहारानयास्तात्॥मग्नेनंमध्यिमाब्धेःपरयुवतियशाद्दीप्यपूर्वाह्णतोरोधाताभ्रश्यत्कुसुंभज्वलितमिहविभ्रत्कार्घ्यंवदंति॥७॥ततःकलावानपिस्वीयकलाकलापेननिखिललोकलोचनानिकुवलयानिचाह्लादयन्नभिनवशिखरराजिविराजितमुदयाचलमूर्धानमारुरोह॥रतिनाथसहायतांप्रपन्नःकुमुदानंदकरःकुरंगलक्ष्मा॥ककुभांवलयंविभासयन्नुडुगणैरिंदुरमंदकांतिकंदः॥८॥नूनमिंदिराबंधोरिंदोर्मदनसहायतांश्रियाप्रार्थितेनभगवताश्रीशेनेवप्रतिपादितं॥गीर्वाणैःसंप्रमथ्यप्रसभमपहृतश्रीःपितामेकलाबांस्तत्पुत्रैर्बंधुरिंदुर्ममवितरविभोरुत्तिमस्यानुरूपां॥पद्मावाक्यानुरोधादितिहनुजरिपुःस्वीयसूनोःशशांकंवारंवित्रंजिगीषोःसपदिरतिपतेःसात्वभूतंचकार॥९॥अपिच॥यातेस्मेचंडभानौनिशिनिविडतमस्तोमसंपूरितायामिंदुर्नीलांबरेणावृतवपुरसितंस्वास्यमंकच्छलेन॥छत्रैवंमानिनीनांमनसिगतमहोमानमाद्धिद्यचित्रंभित्त्वारूढःकुरंगेपरिपतितनभस्याशुराजाहिजानां॥१०॥अत्रहेतुः॥मानाभावात्स्वपत्न्याअनुनयजनितंसौख्यमप्राप्यमानंदत्वान्यासांतद्दिक्षुस्तमथविनिद्धोरोहिणीचिन्नदूतौ॥स्वस्यासोसन्निधानादुपमरतिततस्तन्मविज्ञायजाडयात्भूयोभूयस्तदर्थेविधुरतियतनेनाकनाप्यासकामः॥११॥अपिच॥वयंविजितदृढयाविषयसंगभूत्यावयंवयंप्रशमितेंद्रियाइतिचगर्वभाजोनरान्॥स्मरेणजपताप्रबंविहितएषतभासिकाविलेपनकृतेसुधाचषकदुंदुरुज्झते॥१२॥सौभाग्यंकिलमूर्तमेककुभांलीलारविंदमितंलक्ष्मादेवनकंदुकःकिमुरतेःपात्रंस्मधाभोजिनां॥शृंगारस्यकरंडकःकिमुदधेःफेनस्यपिंडश्रियाद्रित्थंसंजनयन्नभंससमुदितःप्रोद्दामधामाविधुः॥१३॥इत्थंतत्कथितस्कलोकेषु॥भृगुरधिस्कधांशुधामद्यलितविपुलतरांतरालांवियच्चरचकोरनिचयस्यामृताज्ञानशालामिवसंप्रदर्तांत्रियामांसमालोक्यविष्टंभितगमनवेगःसंपादितसाध्यवि

धिश्चतैरेवतपश्चिभिःसहतवैवनंनिशामनेषीत्॥कोकानांविरहेणनूननरनेसंदग्धवोदाधिनाकांनाक्षेपस्करणानुरक्त
तरुणीप्रेमातिरेकेणच॥पद्मानांपरिमिलनेनकुमुदप्रोन्मीलनेनस्वपक्षोकस्वापस्करेणसार्धमगमद्दोषादिशंपश्चिमां
॥२४॥ननः॥अर्धोन्मीलत्कमलमुकुलोपांतनिर्मुक्तगुंजत्षट्पदालीकलरवनुतस्फीतसौभाग्यभूमिरं॥दिङ्मालिन्यप्रस
रगरलश्यामकर्पूरगौरःसुसोहुत्थद्विजकलकलैःप्रादुरासीत्प्रभातं॥१५॥तस्मिन्प्रभसरे॥क्रीडामुत्थितपक्षिपक्षचलने
र्मालिन्यमत्यागतःसंस्कारंवपुषोजनोत्सवचयप्रेंखांस्फुटसंकजैः॥हास्यंचापिविधायभर्तुपगमार्थानंविनान्यालयेप्राची
संगतसत्तैकेवरसमभूदुन्नीर्णवर्णव्रता॥१६॥अपिच॥खंडितामिवनांप्राचीमनुनेतुमिवांशुमान्॥स्वकरस्पर्शमाचेणक
तथाननुरागिणीं॥१७॥वृहत्तिमिरसिंधुरप्रमथनार्थमुद्यछतोहरेःसपदिकस्यचित्समुपलेलिहानस्यह॥मुखाद्वहि
रुषामतानदशनायजिह्वेतिकिंतनाभुविबिस्मयंतरणिर्बिंबमर्थोदितं॥१८॥नभोभर्तुमित्रप्रसरदलिमालिन्यशार
दःसहस्रांशोरुच्चैरुदितवतिबिंबेद्युतिमति॥तमोनश्यद्रोत्राविवरदुवसंधिष्ठितमपरंमुनीनांयच्चित्तंतदपिपरिहर्तुं
भृगुरगात्॥१९॥उषस्सिसरिज्जलेमज्जनंविधायकार्यभरादिवसंजातसंकोचंनित्यकर्मसमाप्यहृतविषयवासनानि
धनोस्तपोधनानविलंबितंजिगमिषुर्भृगुःसविनयमिदमभाषत॥भवतव्यवचःपथ्यपाथेयपथिकःपुमान्॥पाथो
धिमपिविध्यंबुप्रायंनमनुतेकथं॥२०॥तत्कृतकल्याणरचनेनभवदाशीर्वचनेनसमुत्पन्नकार्यविधानदास्योहंनि
र्विघ्नंगंतुमुत्सुकोस्मिमामनुजानंतुभवंतइति॥अथकथनीयकीर्तयोभृगुमृषयःप्रोचुरुच्चैः॥पंथानश्चाशिवास्तवाम
लमतोगंतुंकंठीरवक्रीडादारितदंतिराजकलभैर्जुष्टांदशंमातर्यः॥याहिस्निग्धमुपेहितातचपलंस्कृत्यंचकृत्यंबुधैर
क्लिष्टंप्रविधायसाधकइवश्रीकंठचापच्युतः॥२१॥तन्नातःकृतकृत्यस्यतवास्मिंपुनर्दर्शनमस्तिति॥मुनीनाशाना

माशार्वचनरचनोत्पादितधृतिःप्रशांतव्यामोहःसंपदिसनिनांतप्रमुदितः॥चित्रोकीसंचारक्षमगतिरजस्याधिवसति
प्रतस्थेप्रस्थानोचितविधिमुपास्येष्टफलदं॥॥इतिभार्गवचंपोहितीयस्तबकः॥॥ततोभृगुर्गछन्नध्वनिकृत्यसिद्धिसूच
कान्शुभशकुनानवलोक्यसहर्षं॥ध्वांक्षादक्षिणतःप्रयांतिसहसाचाषाःपुनःसव्यतश्चेतोमोदभरानतंचहरिणशा
वेनमाकंपयो॥मंदंगंधजलोधबिंदुनिचयप्रोद्यूतभाराद्विवातिक्लिष्टवियोगिनीहृदवनीसीरःसतीरःपुरः॥१॥तत्सर्वथा
हृतकार्योहमार्यदर्शनार्थमागमिष्यामीतिविचिंत्यअनेककोटिविमानवलयशालिनात्रिदिवाध्वनाविलंबितपदंसंचर
न्ज्योतिश्चोमादिनाप्रासनाकसौख्यान्विलोकयामास॥क्वचिद्बुधसुंदरीसरसतानतारस्वरप्रभूतरसलालसप्रसृत
कर्णभृंगारकः॥क्वचिद्युवतिकोमलाबयवसौधवालोकनप्रदत्तनिमिषोद्भिमतल्लिमितनेत्रपंकेरुहः॥२॥क्वचिच्चटुल
कोकिलाविकलकंठचंटारवप्रतिध्वनितपूरितेमहतिनंदनाख्येवने॥स्मरप्रहितसायकव्यतिकरातिभारुःस्वयंपपात
चमृगीदृशःस्तननगांतरालेग्रवात्॥३॥क्वचिन्नुलुलितनीविकंचुटितहारमारात्द्रुतंद्युदस्तवरचोलकंघटितहस्तमा
नालकं॥प्रदष्टदशनच्छदंत्रिदशवारवामभ्रुधासमंसमरमारभस्मरजसामकश्चित्कृती॥४॥विषमशरशरप्रभिन्नव
क्षस्स्थलमतिप्रतिकर्तुमस्तधैर्यः॥प्रभवदपनयंस्फजाहिबंधेर्नरवदशनैरबलांदुनोतिकश्चित्॥५॥इतिसपदिविलोकय
न्नयज्ञोदिविचरकेलिकलाकलापमारात्॥स्फुरसदनसदोधिनिद्यदूरात्चरितपदंप्रययावसज्जमानः॥६॥अपिच॥गी
र्वाणवाणिनीभिःसहपुण्यधनव्ययोपभोग्याभिः॥रमनःसुरानमन्यतजारान्वारांगनाभिरिवलुब्धान्॥७॥इत्यतिव्रज्यद
द्वारकद्वंदमंदगतेनतत्पुरस्थान्यपिस्थानान्यतिक्रमितुंकृतवेगोभृगो॥स्वर्लोकंसमतीत्यगछतिपुरस्तस्मिन्नतर्कि
स्फुटंदेवेर्धामरमात्रलंघितहरिचक्रःससोरोहरिः॥किंवापादपपादपाटनपटुर्वातःकिमेवंपुनःकाकुस्थःकिमु

त्यधाशरशिरःसंचारद्वारःशरः॥८॥एवंतर्कितवत्स्फुरत्पर्वसुमहल्लोकादिलोकानानिक्रम्यकिन्नरैःकिन्नरीभिःसमंसननसं
गीतविनुतरिंगतरंगांविष्णुपदोद्भूतगंगामवदात्यावृतःप्रतस्थे॥जनकभवाद्दुर्नांतंविज्ञातुंश्रोमद्वर्त्मनैव स्फुरत्प्रभसेलं
कास्कानंविधिमूनरगात्समीरसूनुरिव॥९॥सत्यलोकाभिधायस्यसार्थकान्यव्यपेक्षया॥नोधस्येवपितृप्रीत्यानामराजी
वलोचनः॥१०॥नमचरद्धंसघसंगिनोनेनास्तिकाचारपथानुसारिणः॥नयोगनैष्टिक्यशमाद्यकारिणस्तेयांतियेधर्मध
नैकशालिनः॥११॥यस्मिन्श्रीश्रीमद्भगवतोविराड्रूपस्यविष्णोःशार्ङ्गभृत्तेस्फुरत्तालफलतयःस्फुरतयःसमवलोक्यंते॥नैना
वतैव॥संवत्सरायनयुगर्तुपक्षमासकाष्ठाक्षणमहरद्यमुहूर्तकाद्याः॥कालप्रधानमहदिंद्रियचित्तधर्मप्राणाद्यय
स्तनुभृतोनिषसंतियस्मिन्॥१३॥बृहद्वनंतांमेरुंवहिमानेःसर्वतोवृतः॥यथार्केदयोन्मेलसद्मकोशःशिलामुरुवेः॥
॥१४॥परिवार्यकारोच्चतरगोपुरैःसर्वतःकमनीयंतन्मंमस्मिंस्वकांतिकल्पाकवलयन्विराजते॥यत्संतनःसंततवस
दूसंतानचिंतकासंतिकाविकासिकुसुमसौरभ्यलुब्धमधुकरनिकरमृदुमधुरझांकाराभिसार्व्याहृतविरहाधीरमधुकरी
गणयत्प्रविलेपोद्वत्यवमानसंचलन्मंजुसंतानतरुपल्लवैरनिशंदिव्यांगनासंगानिसक्तानांपूनांसुकृतचामरविडंबना
न्निसंस्तुपवनानि॥यत्रस्वयंसृष्टिविधानदक्षोदक्षादिकाध्यक्षगृहीतशिक्षः॥साक्षात्स्वयंभूर्निवसत्प्रभीक्ष्णंकःक्षीणधी
स्तंक्षमतेप्रवेष्टुं॥१४॥यस्मिन्निखिलजगन्निर्माणवैदग्ध्यनिधेर्विधेरस्तिसभा॥यस्यामखिलनिगमार्थपरिशीलनपरि
ज्ञातधर्माद्यनेकसाधनसमूहपरिष्कृतहृत्कषायास्तत्रणोमोक्षपदप्राप्तिक्षमाअपिस्वोपास्यचतुरास्याभिमत्यासंग्रामद्विप
राधावसानव्यवधानाःपूर्वचित्तद्यप्सरसांमधुरमधुमाधुरीसधुरीकरणपटुमाधुर्यसरससंगीतश्रवणजनितानंदतुंदि
लमनस्तपस्विनःसभ्यत्वंभजंति॥यस्यांचवासवादिविबुधविद्याधरसिद्धगंधर्वैर्निजमुकुटतटरचितविमलहीरनीरा
जितचरणराजीवःप्रजासर्गनोदितप्रजापतिमंडलोजगन्निर्माणप्रवणांतःकरणःस्वयंभूःस्वीयमध्यासनमध्यास्ते

तस्मिंमहाध्वनासंचरन्कापिसज्जमानोवैवमज्जनकहज्जानामितिसज्जमनाःसज्जनागृणःपथिनमज्जननमस्यान
पेक्षोविघटितपुरटघटितपट्टकपाटिकाद्वारसमतिक्रम्यनसारविरचितरम्यकुट्टिमांतरांतरानिबद्धेंद्रकांतकांत्युपहसि
तभगणंसभागणमुल्लंघ्य॥भृगुः॥परिस्फुरतिमिरोघंपावकोद्दीप्तकार्तस्वरविरचितभित्तिव्युत्सरत्प्रभाभिः॥अथझटितिस
भांतंन्यस्तभित्तिर्विवेशनिजजनकस्तुत्यदुष्णरोमूत्रधारः॥१५॥सतिस्फुटप्रवेशेतस्मिन्॥चिरंगतयोःपुत्रजनित्रोःप्रियसं
गमं॥पश्यामोहंतहृष्यामःप्रणयोद्रेकदर्शनात्॥१६॥एवंसमुत्सुकेषुसभासत्स्वभृगुरपिविधातुरविदूरेसंचेन्यस्फुरतगुणव
र्णेनप्रणामःस्वप्रौढिंनादयन्सावज्ञंनिजपितरमनवेक्ष्येवमविवेद॥सानंदोपिसवंदनादिषुपितुस्यस्कार्यमर्यादवत्॥सा
वज्ञंनचकारकारणवशान्नस्नेहप्रणामादिकं॥सोत्कंठापिचिरागतप्रियपरिष्वंगायलज्जावशादुन्मुक्तप्रणयेवभर्तरिपरिरं
भंसनीवांगना॥१७॥तत्रावसरेसदःसमक्षं॥आत्मावहेलनंमन्वानःसमन्वादिजनिताकमलासनः॥रोषावेशाकशायि
लोचनगुणधूचापवेगच्युतापांगोद्दामशिलीमुखैस्वविभिदेदृत्संकल्पांतंभृगोः॥नैवस्नेहवशेननेविदधिरेभेदंमुदारेमिरेत
स्मिन्नस्तगतागतंपुनरहोमोहस्यचित्रागतिः॥एवमधिरोषनिःशेषितधृतिर्विकृतनयंनिजननयंदिधक्षन्निवविलोकयां
चक्रे॥आश्वमेकिमिदमर्धारमानमानांक्रोधोयत्धरतितरांधतीनराणां॥यःस्वस्योदयसमकालमेवचक्रेसावज्ञंशतधृति
माशुधैर्यरिक्तं॥१९॥पुनःस्वतनयेविनयसंभवःकथमित्याशंक्यचिरंचिंतयांचकार॥दक्षादक्षादयःसर्वेतनयानयव
र्त्मनि॥अयंकथमिवोत्पन्नःसभगाकुटजांकुरः॥२०॥विस्पष्टंदुष्टसंगेनकष्टंभ्रष्टाहिमत्कुलः॥नकिंमृगमदामोदोहि
गुसंगेननश्यति॥२१॥तथाभूतानांकेषांचित्संगेनतद्भावमासाम्यास्येदृगोदृत्येनकिमप्याश्चर्यं॥काकानांकुरुतेननेन
फणिनांदंशेनहिंसायाप्यात्माणामसदाश्रयानांस्वयमनछेदेनविद्भक्षणात्॥कोडानामथरक्षसांद्विजवधाद्वाप्यु

नापाननोदुष्टानामनयादिदुर्गुणचयात्थाहंतकोविस्मयः।।२२।। अथवानेकस्यसर्वाण्यप्यषात्यानिगुणैःसमान्येवभवंती चं०
तिनियमः।। कमलासुधासुधाकरहलाहलशंखबारुणीकरिणः।। नरतुरगधेनुभिषगप्सरसःसिंधोरपत्यानि।।२३।। अपि च।। तएतेस्कनवःख्याताननंकिरणमालिनः।। भिषजावश्विनौशास्तायमःक्रूरःशनैश्चरः।।२४।। पटीयाननघश्रीमान्च द्रान्योपीत्यदर्शनः।। विनीतस्तनयःपुण्यैरगण्यैरिहलभ्यते।।२५।। तदस्तभूरिसुकृतोहमेवकिमेतेननशिक्षितेनेतिवि चारपरवशमनसिविस्मयनसि।। संबंधभाषणसुखास्तिभिःपरेषांजानंतिहृच्चरममध्यमबुध्यिमंतः।। तच्चार्यधाभूगुरु तःपितुरंगिरसेनस्वांतंप्रचंडतरकोपवह्निंजजान।।२६।। बुध्यापितुस्तेनसुतेवमानेहेतुंविनिश्चेतुमलंनसन्याः।। एवंहिगर्भ रतरांतरास्तोप्रारंभदुर्नेयविधेयमार्गाः।।२७।। एवंस्वपितरिमुनिभिरुपदिष्टशांतिकारुण्यादिसद्गुणाभावमनुभूय।। ततः स्वौत्थ्यपरिहारायधातारमनुप्रणमन्सरस्वतीतीरस्थितमुनिजनादेशकरोहंनेयंमदृष्टनेत्यनुवेलंविज्ञाययांबभूव ।।ततःसनिःशेषितकोपपंकःपंकजासनःसविनयंनिजचरणप्रणतंभृगुमुत्थाप्यशिशिरतमाश्लिंगनानंदंक्षणम नुभूतवान्।। कर्पूरःमहिमालयःसमलयश्मानंदनश्चंदनःसप्रालेयरुचिःशुचिःप्रवहतांपूरःसरित्पाथसां।। समानः न शिशिरेमरुत्कमलिनीनालंपरेपादशाःपुत्रालिंगंमध्यशैत्यनिवहस्यार्हतिनेनेकलां।।२८।। लोकोनरमस्येदंदास्यमि तिसविस्मयेषुसभ्येषु।। निजपितरमनुज्ञाप्यप्रस्थानंचाकरोन्मृगुस्तस्मात्।।२९।। ।।इतिभार्गवोचंपोतनायोस्तव कः।। ।।ततःकतिपयक्षणैःशरणजन्मिजन्मार्जितप्रभूदुरितद्रुमक्षयदवस्यगौरीपतेः।। शिलोच्चयमगाद्रुतंद्रुहिणसू नुरुत्संचरत्समीरणरयाधिकप्रबललोललीलागतिः।।१।। ततोविदूरेपुरएवपुरारिगिरिमपश्यत्स्वर्गगोदकफेनपारद ।।६।। सुधाकुंदेंदुमुक्तास्फुरद्दिग्द्विर्जरधेनुनिर्मलपयःकर्पूरकेंबुप्रभां।। मुष्णानूपुष्टतरेणकांतिपटलेनात्युन्नतोराजतैके

DR. BHAU DAJI MEMORIAL डाक्टर भाऊदाजी स्मारक

प्यसौ लासःसुरधुर्यधुर्जटियशःसंघातएवेंद्रुवा।।२।। यत्र।। नोल्लासःपंकजानामविकसनमथोनेयमिंदीवराणांयोगःकोकांगें ना नांमभिमतिरनिशंकामिनीनांनयस्मिन्।। तापःसंचारभाजांरविकरनिकरान्नेंदुपीयूषभाजांक्षुद्बोधश्चांडजानांविपु रहररशिरश्चंद्रिकासन्निधानात्।।३।। गौराकर्पूरगौरोरगतुहिनकरोक्षादिभिःक्षारगौरैर्दृग्दोषांतायचातंनयनफणाम ध्यमुक्तेपुनैत्यं।। नूनंतस्मादिवाढ्यस्फटिकमणिशिलाजालशालीसशैलप्रोद्गच्छन्मेघानुकारिद्युतिभरमकरान्निंधुरा ना नूसंदधार।।४।। इतोबकुलमंडलंनवतमालमौलिंतःकदंबकदलीमितस्तिलकतालसंधानितः।। इतश्चकदलीस्तनोविबु धपादपानांकुलंपुपोषमहतामहोश्रितजनेनकंपाप्नुयात्।। इतिकौतूहलांचितचित्तःमहिजःक्षणमवलोकयांचक्रे।। तस्मि न्ननचरनवसंनावतारविस्फारितनयकिंसुयकुसुमभराभुग्नबंधुरस्कंधतरुसमारूढकलकंठकंठध्वनिप्रतिध्वा नवति।। अस्फुच्चतरुशिखरारूढकिन्नरमिथुनषड्जादिस्वरगीयमानमहेशयशःपीयूषमकरिमाणमास्वाद्यानंद व संदोहपरेणोत्तयाविगलितस्मृतिःक्षणंबभ्राम।। ततःकार्यवशादात्यस्मृतिर्भृगुः।। हरचरणराजीवालोकनोत्कंठितस्वां तैर्विबुधविद्याधरतापसादिभिरनिशमभ्यस्यमानपदव्याश्रीमन्महेशद्वारप्रदेशमासासाद।। भ्रमत्कुटिविभ्रमद्विकट चंडदंडायुधप्रचंडभटमंडलीभुजभुजंगभंगस्फमेः।। तुषारगिरिगौरवैःप्रमथयूथनाथाधिपैःसुगुप्तमनिशंनिशा करकलावतंसानुगैः।।६।। तत्रनिजनाथानुजन्मायमितिसविनयंनमद्भिःप्रमथगणैरनिवारितएवप्रविवेश।। वार णशतानिविघ्नैःप्राप्यंतेक्षुद्रभूपतेर्द्वारे।। द्वारेधनदपतेरपिनैकमविघ्नंवारणं ।।७।। अथचपल्लपदंसदः सन्निधिंसविधिरुतःसमासाद्यअतर्कितकार्यविधानदक्षःशोणाक्षिकोणेनक्षणमपश्यत्।। यस्मिंस्तच्चवमर्शहर्षित तनूरुहैःसनकादिसिद्धसमूहैरनुक्षणमुपास्यमानःसभगवान्भवःसततमास्ते।। गौरवंगीयतेनस्मिंकिमन्यैर्जग

तांगुरोः॥सद्योजातोपियःप्राचामाचार्यपदवींगतः॥९॥कुनारीपीनोरःप्रभवपरिरंभव्यतिकरः॥कुशून्यव्यामोह व्यसनतिरास्यनिरतिः॥तयोरेकत्रैवस्थितिमपिनिसर्गादियमयोःसदान्यस्तास्तूयंघटयितुमलंकस्मदधरः॥१०॥ यस्याद्भुतंचरित्रं॥यःसकललोकभवभयसंहरणोपिभवोभीमभ्य॥यश्चसर्वामरमौलिरपिकपर्दी॥जगन्निवासोपि स्मशानवासः॥सर्वजगद्वंधःप्रहीपिभिक्षाशनः॥जगत्प्रावरणोपिकोपीनधरः॥दिक्पालार्पितशरीरप्यकिंचनः॥ आहोमिवपदवींप्राप्तःकुबेरोप्येतत्समादावामविपुलसंपद्वरोपिलोकेकृतघ्नतानिर्भयेत्वेनास्याकिंचनत्वंकथमुपेक्षते॥कोपिनेंदुकपालकृत्तिभसितप्रेतास्थिमालाविषव्यालालंकरणस्यसत्पदपतेरर्धांगजायाकृतेः॥दारिद्र्यं धनःस्मशानवसतेर्भृत्यकेशःसखाख्यातोसौधनदोमुधाबुधजनैर्योनाभिजानातःखलु॥१०॥ अत्रकारणमेतदेवोपवगम्यते॥लोकेयत्किलयेभवंतदखिलंगौरीशकारुण्यतोनिःस्वत्वेखलुतत्यकारणमदःशंकेहमेकंपुनः॥यस्माकांतधनाहियांतिधनिनोनैःस्वंतुपक्षीपिपःकोशोयस्यसदाधितिष्ठतिनकिंयास्यत्यसौनिःस्वतां॥११॥सइत्थंसभोपांतेनिषद्य स्वांतेएवसविस्मयंतर्कयामास॥ततोभगवानपिचिरादुपगतमात्मबंधुमवलोक्यसोत्कंठं॥उत्थायसंगाढंलक्ष्मीकांतोत्तरि तमथनयनबंधुश्लेषदुःखस्वांतादुच्चैस्तरांपीठात्त्वरितमथस्कृत्स्नेहपाशाविवश्यो॥दोर्दंडौसंप्रसार्यप्रसभमदग तिःस्नेहविक्लिन्नचेताआश्लेषार्थंसमायाद्गुरुसविधमहोमोहपाशोबलीयान्॥१२॥इत्थंनीलकंठंनिजोपकंठंसमागत मवेक्ष्यसनिरस्कारंभृगुरवोचत्॥श्रूयतामनघिज्ञ॥स्फुटंप्रीतिर्लोकेसमगुणवतामेवसुभगाधुनेशात्मंभूवाचरितमकथवासःक्वचमम॥नमांस्पृष्टुंयोग्यःकिमुतपरिरब्धुंवपुचिःसमीहेसंबंधंनतवभवदूरंभवजनवान्॥१३॥किंच ॥चिताभस्मितभूषितंविगतशौचमाभीषणंकपालदृवचितंडमुडस्रजा॥स्मशानमिवतेवपुर्यदनवेक्षणीयंस

दापदाचरणशालिनःकिलनरंतुमस्मिन्समाः॥१४॥एवंअखिलश्रुतिनिकरसंस्तुतपदपंकजःशंकरःअकारणे दुरुक्तैस्तुदंतंभृगुंशोणायमानदृक्कोणेनावलोक्य॥कोपाटोपाधूतभ्रुकुटितटभवद्दातसंपातदीप्यज्ज्वालस्फोटद्य दृष्टिप्रसरदुरुतरज्वालमालावलीढं॥ब्रह्मांडंसविधित्सन्निवपवनगतिर्बाडवंहंतुमुच्चैरुद्यद्धामशूलंप्रमथप तिरगादाशुसन्मन्युमोहः॥१५॥तंप्रत्यनिपुरुषतरमभाषत॥तत्राभवीवरनितंबकथंबतासिनित्यहोमप्रभवधूमविधू सराक्षः॥किंमर्तुकामइवजल्पसिमामनल्पंभूलाहतस्यजकुलायमिदंमदग्रे॥१६॥एवंभगवतःखेडपरशोरकांड विध्वंडभंगशंकाशांसिनृशंसरोषभीषणानलज्वालावलिषुपतंगाइतमात्मानमवेक्ष्यसभृगुर्भ्रमद्बाहुःसरभसम भ्यरुंभनायश्रीशंभुसंभावनायसौभाग्यभुवंभवानीसंस्तवेरदभ्रंसंभावयामास॥सरभसतरसारचंडदोर्दंडस न्नंगलाहृष्टकोदंडदंडाग्रनिर्मुक्तनालीकरंहस्त्रसंन्यस्तशस्त्रास्त्रसंभावितोदारपादांबुजे॥प्रमथितजगदंड वेत्तंडदंडायुधक्रोधविस्फूर्जितप्रोद्यदुद्दीप्तविभ्यन्मताधिप्रशांतिक्षमोहारकीर्तेंदुभूरिप्रभापूरितशेषदिग्मंडले ॥प्रचलदमलकर्णतांटंककोपांतसंभ्रांतसत्धीरकोद्दंडदंडप्रभाचक्रवालस्फुटोदारसंचारलीलाभिभूतोदितग्री ष्मनैतिग्मांशुतिग्मप्रभे॥प्रकुपितशिवकोपसंप्रच्यवद्दूरिदानोद्दयोद्दामदर्पांधगंधद्विपालानसंदर्शनेपाहिमा मद्यभूताधिपोद्दग्रशूलाज्जगत्धात्रितुभ्यंनमः॥१७॥तदानीमनुकंपयातदवनाय॥हरद्योतोदारमहसितगुणा क्लृप्तपुरजिन्मनोमानामानापनयनविधौव्यग्रमनसा॥सराभाव्यंयस्याःप्रमथपतिनामाद्दरभवच्छिवासाक्षाद्दक्षा धकदनकोपप्रशमने॥१८॥कोधोद्धतांधकसपत्नविरंचिसूत्रोर्मध्येराजगिरिराजस्फुतानतभ्रूः॥लोकत्रयांतक रमत्यसुमूर्षमध्येदिव्याजरामृतिहरामृतवल्लरीव॥१९॥अत्रांतरे॥महोषप्रारंभेदरविकसदिंदीवरदलोल्लसल्लीला

त्तास्माद्दतिपदुरपांगोनगभुवः॥भृगोर्भ्रंशयदुधेर्भयमपनयन्नाविरभवद्दृशंकोषाविष्टंशमनशमितारंचशश्वय चं॰
न्॥२०॥तदानीं॥प्रभवतिमत्यतिघातादनिशमसाविति समत्सरमनंगः॥दुर्गापांगसहायःकोपांनेशिवमनस्यआविर
भूत्॥२१॥ततःपंचेषुरचंचितचपलचिनकुरंगमनंगरिपुमवगम्यविरंचिस्मताचपलतरसंचलदंगुलिकलसंचारसं
चालीतवीणागुणनिचयसंभूतगंभीरमधुरस्वरमाधुरीविडंबनपटुतरेणसविनयमिदमूचेचलकन्या॥अविदितप
रिणामःकर्मणामग्रवीणःप्रवणमतिरभास्तेनेष्वदस्तावदास्तां॥तमसिविदिततत्वोदुष्कृतस्याग्यकस्माद्दिजमनुज
मिमंतेदेवरंमेभिहंसि॥२२॥इतिनुहिनगिरींद्रकन्यकास्यप्रवचनपाशानिबध्यहृद्दिहंगो॥गतवतिशाममीश्वरेससद्यश्च
पलमपासरद्दस्मदृष्टिपातात्॥२३॥कुपितमृगेंद्रमुखादिवप्रमुक्तश्चकितविलोलविलोचनःकुरंगः॥चपलपदंप्र
क तमसःपरंपुरस्तात्सभृगुरगारमगादघांतस्य॥२४॥इतिभार्गवचंपौचतुर्थस्तवकः॥ ॥ततोध्वनिगछभनभृगुः
सहर्षंअहोमुनिवराशीर्वचनकवचेनेद्यसंरक्षितोस्मीतिवदन्नकस्मादेवपुरस्तेजसांराशिमपश्यत्॥किमेत
ण दितित्रसादरंदृष्टिंप्रसार्यश्रीरमणचरणपरिचर्यात्पसालोक्यानांमहाभागवतानांशरत्किरणमालिमंडलोज्व
लप्रभैरनेकैःसमानैरविमानैःसर्वतःपरिष्टतंश्रीमद्वैकुंठारव्यंलोकंददर्श॥मग्नायेनतरांपुरामपुनरावृत्यैपुराण
स्तुतश्रीमोदश्चरदिंदुसुंदरयशःपीयूषपाराविधौ॥तेमायापटलंव्युदस्यविगलत्तापत्रयाःसर्वतोवैकुंठेखलुयांति
नैवमपरेमारेतरसाधनैः॥१॥किंच॥तमन्मसुचिसूदनस्फुरदुदारमौक्तिकस्रजसंवलद्दृहलकांतिना
राजिते॥हरेःपदसरोरुहेरतिभृतांनभूयोभवेद्भवोभुविभवंतकद्भुवनभाग्यभाजांसतां॥२॥अपिच॥य ॥८॥
द स्याःशोभनशोणकूणितचलद्दृक्कोणनेसर्गिकस्निग्धापांगतरंगितेक्षणलतेर्यक्षेंद्रदृक्सादयेः॥

तर्यंतेतितरामुरीकृतमहद्यत्नैर्यदावासतःसाश्रीराश्रयतेश्रियंश्रितनुतालोकैःसकैःस्तूयते॥३॥यत्रत्याःपशुपक्षि
णोपिनितरामानंदचिन्मूर्तयःसर्वेशार्ववदुर्वनुग्रहजुषःक्षीरोदकन्यापतेः॥धन्यंतत्रिपशुत्वमेवमहतांशोच्यंनयत्संमतं
न श्राशानुग्रहभाजिनंतदिरद्यार्थंस्करत्तंदिवि॥४॥वैचित्र्यात्कर्मणांयत्रवैजात्यंनैवजन्मिनां॥नूनंमनोविनोदायश्रियःकांतेनकल्पितं॥५॥अपिच॥यत्रारामस्करस्यसामनिलसत्कासारतीराश्रितोहंसीभिःस्मरदीपदीपनपरैर्भावैरपिश्रामिनः॥हंसः
कंसनिषूदनस्ययशसामालापमालामिवश्रुत्योद्यत्कलकंठकंठनिनदंत्यजस्रंस्वादरं॥६॥अथरीलतामरीजनगानझरी न
माधुरीधुरीणापि॥हरिचरणशरणमनसांनमनःक्षोभायमधुकरीगीतिः॥७॥अपिच॥प्रोन्मीलन्नवपुष्पपल्लवफलोदारर्धिभा
राननेरर्थिभार्थितकिंचिदर्थनिवहाधिक्यप्रदैःपादपैः॥स्वच्छायेषुविहारधीरमनसामत्यादरोहंपुनर्यत्राकारिमनोभिवांछि
तफलाभित्येरभायःकल्पतरवेनराःश्राशाःश्रियःश्रियः॥८॥यायाणोमणयोयत्रधेनवःकामधेनवःतरवःकल्पतरवो
नराःश्राशाश्रियःश्रियः॥९॥सतत्रिभजात्मजःसुविशुद्धसुधांशुधामधवलिमाधरीकरणपटुत्रिधसौधावलीमध्यवि
न्यस्तशस्त्राधना॥उभयतस्तडिल्लतानिर्मलकांतिकांताजनमहचरमित्यगणगीयमानानवद्यभगवद्यशःश्रीश्रृण्वन् स
नमद्दारकवृंदसंमर्दसंचलन्मौलिसंघर्षविगलदनेकरत्नावलीसैकतचित्रंश्रीपतेर्हारप्रदेशमासासाद॥हारेहीर
प्रवरकिरणोद्योतितेवारणोद्यत्प्रासेश्रीपत्यनुचरवराधिष्ठितेपिद्विजाग्र्यः॥चित्रंलेभेक्षनिविदपिनोवारणंतत्रहेतु
त्र रत्रिमित्तंनिवसतिविभुर्वारणेंद्रस्॥१०॥तत्रसंमामानिवारितप्रवेशः॥सविप्रःक्षिप्रमंतर्भवनमाविवेश॥प्रभूत
किरणावलिलसदनेकरत्नोपलैःस्फुटंघटितकुट्टिमंचतुरइतिसंधिष्ठितं॥तदंगणमतीत्यसत्वरितमाविवेशागतः
प्रभोःशयनशालिकानिकटमुत्कटोत्कंठया॥११॥तत्रानेकशतमणिमयस्तंभराजिविराजितांतरालं॥रुक्ममय

कुड्मलंस्वमदीममणिद्वीपांशुजालविदलितनिःशेषतिमिरोपरोधो॥गवाक्षरंध्रनिर्गतसुरभिधूपामोदसुरभिनहरिदंतरालो॥सुविशालोशयनशालांप्रविश्यापश्यत्॥पर्यंकेसुरधेनुनिर्मलपयःफेनायमानामलमौक्तिकमक्षरछदवतिमस्वापदक्षणः॥पद्मालोलकरोपलालितपदःप्रद्योतमानःप्रभुःशेतेशर्वसरोरुहोद्भवमुखैर्धीणनाथस्तुतः॥१२॥तथाभूतंतमवलोक्यरुष्टोमुनिः॥अहोकष्टमैश्वर्यमदपुष्टोयंदृष्टनयास्पष्टमस्मद्विधगरीष्टशिष्टागमनेपिनष्टवद्भ्रांनिद्रामनुभवति॥गृहमागतवतिपूज्येस्वविनयसधर्मतत्परैर्मनुजैः॥प्रत्युत्थानादिविधिर्नूनमनुष्ठीयतेनमद्गमनैः॥१३॥विद्याभिजनजन्मौजोरूपयौवनबुद्धिजाः॥मदाःसर्वेपिनार्हंतिश्रीमदस्यकलामपि॥१४॥एवंमत्वाविदूतनयनःसंचलद्दंतवासारोषावेशाकलितमनसानिश्वसन्भ्रांतभ्रूः॥धावन्नुच्चैःसरभसमहोश्रीमनोहारिविभ्रःश्रीशस्योरःसबलमधृणःस्वांघ्रिणासंततोड॥१५॥ततःप्रबुद्धोभगवान्ब्रह्मण्याग्रणीःकरुणापियूषरसपूरितस्वांतःस्वांतिकेप्रांतारूढनयनसंभोजभूतनयमवेक्ष्य॥तत्कृतासत्कृतिमविचिंत्य॥निगमागमपारावारपरिशीलनोद्भूढरूढमनिविभवमहानुभावबुधिसिध्यांतितापवर्गमद्विप्रानुद्दिश्यधर्मजनसंग्रहार्थंस्वयमाचरन्नचपलपदंपर्यंकादुतार्यसविनयमवनिसुरचरणकमलमुपस्पृश्यनमयांचकार॥पर्यंकेनुपावेश्यद्विजवर्यंतमार्यधीः॥सुखयंःसमर्यादमुदारंवक्तुमुद्यतः॥१६॥धन्योहंकृतकृत्यतामुपगतस्त्वत्पादसंदर्शनंजातंमेतिचिरार्जितोरुसुकृतादद्यानवद्याजनिः॥किंवादुष्कृतमस्तियन्नलुतवान्प्रत्युद्गमप्रभ्रमत्कक्षाननमस्कृतीश्चकुशलप्रश्नंचतत्सम्यतो॥१७॥चरितागस्यनभिज्ञेकुप्यंतिनदीनवत्सलाःसंतः॥श्वासविनैकमथानिद्रितमृतयोश्चकःपुनःपिशुनः॥१८॥प्रभूतदुरितावल्लीविदलितायमेदोभंगप्रनष्टभवज्जगत्यतुलकीर्तिरद्युज्वला॥जगद्भितमपावनोभुवनपालनाविर्भवद्

॥९॥

लस्तदखिलंभवच्चरणपद्मसंस्पर्शनात्॥१९॥किंच॥भवदाशीर्वचनाजरपाशमतिमुक्तनव्यपदकमला॥चपलापिनैवमुंचतिकमलामांतदनुरागहीनमपि॥२०॥छायेवातिचलारमाकथमहंकुर्यांपुराणःपुमानेतस्याःपरिपालनंत्रिपराचिंतामामासीत्पुरा॥अद्यत्वच्चरणप्रसादजनुषात्यन्तार्थनाम्नाकृतःश्रीवत्सेनगतज्वरोचकिमहंमत्पर्यंयेभोतथ॥२१॥ममावासंयुष्मद्विधविबुधभूदेवचरणप्रसादादहंकुंठाद्यखिलमहदैश्वर्यमतुलं॥अतःसर्वस्वस्याप्यहमहहविश्राणनविधौभवेयंकिबालंकिलसमुपकर्तुंभवतां॥२२॥अपिच॥सुजातसरसीरुहोंतरदलांतसन्माद्रधाधरीकरणपंचमंचरणपंकजातंतव॥स्वभावपविनिष्ठुरंभवदनवेंद्रायुधप्रघट्टनपतत्किणप्रकरशालिबस्तोमम॥२३॥तदेतन्मृदुलेनातिद्रनंतेपदमितिचिंतांचितस्यमेमानसंदुनोतीतिप्रत्युच्चमोच्युतस्तत्पदमंकेनिधायशंतमेनपाणिनासशंकंपस्पर्श॥चूनमंब॥नप्रायोनिःश्रीकेश्रीस्पर्शित्वयसेवनीयत्वं॥हरिरप्यतःशिवेवेस्वोरस्थरमाभिमृष्टविभपदं॥२४॥तद्यथा॥स्पर्शमणिर्निजधातुकमपिसदयमयोपिहेमतांनयति॥हरिदृसंगोत्यगुणाद्विजपदमपिसेव्यतांतथाकमला॥२५॥किंच॥हरेरुरसिधिनासपिनीजघ्निवानिंदिरांपदाभृगुरतःस्फुटंविरतिमत्वमस्माद्गतं॥भुवंननुतदादिकिंद्विजपदोपलग्नेवसावितिनतक्रुरेपिसुचिरंप्रयत्नार्जिता॥२६॥ततःपुनःसविनयंभगवानाह॥अहोबतनमोमुद्रयानिद्रयाद्यमुषितोस्मि॥अभद्रंयनिद्राबतबहलतामिस्रपदवीबलाद्बालावाल्यानपिविपुलमोहंवितनुते॥तदेतोदेवोवानखलुमनुजोवातिविभूयाद्यस्माद्विभवभ्रष्टोभवतिसकलेभ्यस्सहमिव॥२७॥पुनःसविनयं॥भोविहन्कुरुमय्यनुग्रहमिहप्राप्तोसिकस्माद्गुतंतत्कार्यंवदसाधयेमहदृषिप्राणेनचार्थेनच॥वेकुंठंप्रपुनाहिपादरजसाविप्रास्तुमद्देवतंजोगाभ्येषतदर्थमेवभवतांदासोस्मिनिकेतवः॥२८॥इत्येवं॥मधुरपदध्वनिललितांकलितसुवर्णमलंकृतांसरस्वतीं॥ब्राह्मीमनवद्यगुणांगिरमयद

छुतिमनोहरांश्रीशः॥२९॥ततोब्रह्मण्यदेवस्यश्रीपतेःप्रसन्नमुखराकासुधाकरकरोपनिष्यंदमानातिमधुरवाक्सु
धाझरीसुरसमास्वाद्यापिहिजवरचित्तचकोतृप्णांतंनजगाम॥प्रमोदादुनिष्ठ हिपुलकपुलकालंकृतवपुःस्फोन्मीलच्चसु
र्विमलगलदानंदसलिलः॥पृथुप्रेमोद्गाकलितहृदयोगद्गदगलःक्षणंतुष्णीमासीद्गुरुचिरवागक्षमतया॥३०॥ततः
समाविर्भवत्प्रेमरसप्रसरपरवशंमानसंछात्संस्तभ्यप्रभूतानंदसंदोहोद्भवदूर्यश्रुधारापिन्धाक्षिणीप्रमृज्यश्रीमद्भगव
तोयेकुंठपतेरकलंकमुखशशांकेदत्तचक्षुर्वंधांजलिर्भृगुः॥वक्तव्यंकिमुकंजनाभयदहंनिर्हेतुकंतेरमावासेवक्षसिमा
हसादकरवंहंतावघातंपदा॥तन्मेसंप्रतिदुष्कृतंनगणयन्यद्दंसेक्षम्यतांदासोस्मीतिवदन्कृपाजलनिधेस्तेतन्नवैबो
धितं॥३१॥अहोआश्चर्यमकारणकृतापराधतायापरिवादार्हमपिमास्तोषिः॥यतः॥स्तव्यतांत्यक्तमन्यस्तांव्यासागुर्वनु
वर्तिभिः॥पदापितामहंहत्वापितामहमगांकथं॥३२॥सर्वागर्वस्फूर्जथार्वबलभिद्बुर्वादिकव्यादिभिर्दिव्यश्राव्यसुका
व्यनव्यस्फूर्तिभिर्यस्तूयसेसर्वदा॥सत्वंसत्वविधेसिकिंममपदस्पर्शात्कृतार्थःपरंज्ञातंधर्मभृतालयाद्यमहतीब्रह्मण्यव
तांविच्छता॥३३॥स्वेनावासमसस्तनिस्फलगुणग्रामोसिकिंवादतेमाशीर्वचनंतथापिसरिनेदेयंयथातज्जलं॥स्व
स्त्यस्तुद्विजभक्तिरस्तुभवतेश्रीरस्तुचाक्ष्मावीर्यधैर्यमपारमस्तुविजयःशांतिर्यशोस्तुस्तुशं॥३४॥मोसद्गुरुजनैकव
त्सलजगत्यातधरोद्धारकश्रीशश्वाश्रितकामपूरकरुणापीयूषपाथोनिधे॥मामागस्कृतमद्यपाहिकरुणापांगेनये
नत्वयाब्रह्मण्यकरीद्रमूर्ध्मस्फूर्तशार्दूलविक्रीडितं॥३५॥मयिकुरुकृपावलोकंकरुणाकरमामकोयमितिबुध्या॥उचितं
वच्चिकिमपरंमामनुजानीहिमापनेयामि॥३६॥ततःसरस्वतीरोधोनिवासितापसस्मूहस्मेरेशवशादागतेनमयानवस्म
सारात्कृतकार्यत्वमवाप्तमितिपुरुषोत्तममनुज्ञाप्यशिरसानत्वाचरणावभिवाद्यतंप्रदक्षिणीकृत्यसमुद्यानुरागाकलित

॥३०॥

चित्तःसविप्रःस्वमतरंमतस्थे॥३७॥ ॥इतिभार्गवचंपौपंचमस्तबकः॥ ॥अथोविविष्णुपदमेचैकंसेव्यमितिगाढम
तिर्भृगुर्विष्णुपदाप्तस्थितोपिविष्णुपदाध्वनाविष्णुपदानुरक्तान्मुनिजनानभिनंदयितुंभगवत्याःसरस्वत्यास्तीरमाजगा
म॥सोलंठनीलकंठोपकंठेमघोदयोयथातथाप्रादुरभूतेषामग्रेव्यगतिर्भृगुः॥१॥महर्षिभिश्चसानंदंगतिंसुखमसक्तिं
भ्यांकृतार्थोयमागतइत्यनुमितस्तानभिवाद्यतदुपदिष्टसुशासननिर्वाहदक्षिकुशासनंभेजे॥ततःसत्कृत्यमुनिभिःपृष्ट
स्तागमथात्मया॥यद्यत्समनुभूतंतद्दत्स्वमुनिसंसदि॥२॥तन्निशम्यसहर्षभृगुः॥३॥भगवतांभवतामाज्ञयाहंप्रथमंपार
मेष्ठ्यंपदंगतवान्॥तत्रसदस्यकृतप्रणतिस्तुतिमुपविष्टंमामवलोक्यकुपितात्पितुःसकाशान्मद्रक्षणेषुस्नेहदक्षालंबभूव॥
ततःकेशसेपिमामागतमवलोक्यबंधुस्नेहात्परिरब्धुमुपागतोमद्दुर्वचनक्षुब्धमनारुद्रःशूलेनमांहंतुंदुद्राव॥बंधुस्नेहः
स्फुरत्स्नेहस्तयोर्मध्येपरोबली॥पूर्वोपकृतान्नश्येतहितीयोनकदाचन॥३॥तदानिश्चस्तेनमयाप्रार्थितायादेव्याआगत्यकथं
चिदहंविमोचितोवैकुंठंगत्वाप्रभोःशयनशालांप्रविश्यमहांतमनयमकार्षमितिसाश्रुपातं॥सुमेनप्रतिबोधयेहिनिविदं
विदूरत्यमोहान्मदुरुस्फुरत्पद्मकरापिवासितमुरःसुमस्यपत्युःश्रियः॥कष्टंनिष्करुणंपदाभिहतवांस्तापिशांतिद्रुमोयामूचेम
तिबुध्यवाचमुचितांयत्कुंनसाशयमते॥४॥तदासमुच्छलल्लेभभराकलितचित्ततयामयाप्युक्तं॥भोसंवित्स्वरशेषधेगुणनि
धेसद्योगाह्यसंनिधेकारुण्यामृतवारिधेनिरवधेसभ्राणदत्तावधे॥पापभ्रामलनामधेयभजतांदुरवेणसत्पारधेमय्यद्या
विनिधेहिहंतकरुणांमोहंविधेहिद्रुतं॥५॥करुणाजलदस्यतस्यश्रीनिवासस्यकिंकिंवर्णनीयं॥साशांतिःसविशु
द्धभाग्यमहिमासमौदिमासामतिःसासद्भावभक्तिरद्रुतनयःसप्रश्रयःसाकृपा॥सप्रेमस्मरसुधामधुरिमोद्गाराक्ष
रालंकृतासावाग्यत्स्मृतिमात्रतःसपुलकप्रेमाश्रुपानोमम॥६॥तस्मात्॥किंदेवैर्दिविदिव्यसंपदिपदंधत्तेशकचिंताकुलैः

किंवास्मृष्टिविधानदीनमनसापित्राविधात्रामम॥धूलिर्व्यालकपालशूलगरलाद्युग्रेणरुद्रेणवासेव्यःसर्वजनैःकृपाजलनि चं-
धिर्वैकुंठनाथोहरिः॥७॥वागस्मिंश्रुतिहस्तमस्तकपदस्पंदंसुशोभानमानापुंसात्यंतहिताय विच्छुभजनेयोज्यंवदंभंकमात्॥त
स्मैशाकथनेनहीक्षणवीभौतत्कीर्तनेतत्सदाचार्योतनुमनेनदालयगतोतच्चिंतनेहर्निशं॥८॥अपिच॥ध्रुवंध्रुवपदाधिपः
शिशुरकारिदंतावलःस्वर्षाषदमदश्वरःप्रकृतिवक्रनक्रार्दितः॥परागमिलतेजराषिदिविनिर्जरोयेनतंकिमन्यकृपणा र्ज
नात्मकरुणाघनःसेव्यतां॥९॥किंच॥कुरंगोयमितिभ्रांत्याव्याधोविध्याधनत्पदं॥मत्सैधाहमसह्यःपदोरःममताडयं॥
॥१०॥तस्माद्व्यतिक्रूरकर्माणमपिमांयःस्तुतिपात्रंचकार॥तस्मिन्नशांत्यैकधाम्निकरुणापारावारेनवत्मलेहरोसेव्येस
ति॥येकेवलमुदरार्थमेवधनमदांधालुतरुपणधनिकानुपासतेनेतीवमंदाः॥अहोकष्टंदृष्टंकृपणानां॥प्राणादपिपरो
येषामर्थोनर्थावहश्चलः॥तदर्थेहंतसंत्यक्तपुमर्थत्रयमत्रपैः॥११॥पश्यंत्वार्यास्तावत्॥भोभोयाचकवांछितद्रुपरशोकष्टं
नकाराद्मेलइहेकतिसंतितकथयमेतस्मिन्महाचित्रमयः॥वात्यातद्व्ययकारकेत्वयिपुनस्त्वद्यापिनाभूत्क्षयः किंजानासि
नमूढसोव्ययपदप्राप्तस्तदंतःकथं॥१२॥अन्यच्च॥गतदज्ञानंवदंतेतदपिकथंवदतिनेतिचित्रपदं॥अर्थिन्किमत्रचिंतंत्र
रसनवत्वमस्तितत्प्रेतुः॥१३॥अपरंच॥वहेहंभूरिसंपत्क्षपणकथमभूत्सद्विचारादविचारःकोसौयच्चाव्यायानांवदतिमत
मनेकार्थतांपाणिनीयं॥तच्छ्रुत्वासंविचार्यस्वयमहमभवंचाव्ययस्तद्विदित्वामत्यंस्वज्ञातिरित्यंसकरुणमभवत्साध्वभू
तोनकारः॥१४॥अत्राहंमन्ये॥भोगेनात्रपरत्रसद्धितरणव्याजाद्दान्यःपुमान्स्वर्वामाधरबिंबचुंबनरुनेधिसंकरोत्यात्म
सात्॥नुंक्तेनेंद्रियलोल्यसंभवभियास्वर्भोगभीतोभुवंनोद्दतेसुविचारशीलनपरोयोगीवलुब्धःपुमान्॥१५॥इदृशा ॥११॥
नामपिद्यद्रिपराशापरवशमनसःकवयोपिमुधैवामुर्ह्यमंकुर्वंति॥तदस्तुनामालमीदृशाधमचार्तया॥मुमुक्षुभिस्तु

सकविशुद्धशांत्याद्यखिलसद्गुणगणानिहारिद्यमुद्रितान्ब्रह्मादीनपिविहायदीनबंधुःसएकएवसेवनीयःकेशवः॥भ
वभुजगमौतिशमनःस्वजनरंजिनभंजनोविपद्दमनः॥क्षीराब्धिसुतारमणःशरणागतपालनःसुराधीशः॥१६॥नकेवलं
ज्वरनिरत्यर्थमेवकदुक्काथस्येवभवतापनिरत्यर्थमेवसेव्यत्वमस्य॥किंतु॥अतिसुभगतयामनोरमत्वादपीति॥नीलांबु
वाहद्युतिरंबुजाक्षोनिसर्गमंदस्मितमुंदरास्यः॥कुंदद्विजःपीनभुजःसुषक्षामनोरमश्चिंतयतांननानां॥१७॥किंच॥अस्य
हरेराराधनेस्तिसर्वेषामप्यधिकारः॥देवादानुजास्तथानिशिचराविप्राश्चशूद्राःस्त्रियोयेचान्येकुलकर्मजातिविकलाःपा
पाकुयोनिस्थिताः॥तेसर्वेप्यधिकारिणोत्रभजनेविष्णोश्चिधासंपतत्पादोद्भूतसरिद्विचित्रितजगद्धारस्यभर्तुःश्रियः॥१८॥
किंच॥तस्यैोपासनमार्गोपिनात्यायाससाध्यः॥फलैर्वापुष्पैर्वानवकिसलयैर्वोथसलिलैःप्रपन्नैःसमेमप्रसरपरिहस्तैरपि
सदा॥सदेवर्योद्रेकस्वरुचिभृतसुष्ठुहरिदयालुर्दीनानामनिशमतिशंदातुमुदितः॥१९॥यस्यानवद्यगुणवर्णनपूर्ति
मानुशेषःसहस्रवदनोप्यनलंबभूव॥तत्रान्यपामरजनैःकिलतस्यविष्णोरासाद्यतेकथमनंतगुणाब्धिपारः॥२०॥इतिस्वा
नुभूतंश्रुतमत्यादरान्निवेद्यतूष्णिंस्थितेतस्मिन्हर्षितनतनूरुहामहर्षयःसहर्षंतमार्यवर्यंभृगुमुनींद्रमभिनंद्यस्वमनेन्यदेव
तायजनमनाहत्यश्रीरमणचरणपरिचरणप्रवणांतःकरणास्तमेवाराधयामासुः॥सिध्यंतितंनिगमभूपतिना॥पुरैव
विष्णोःपदार्चनमनन्यमनन्यभक्त्या॥निर्णीयतत्तदनुवर्तिमहर्षिवर्यैरादर्शितंसुखदमार्तिहरंनराणां॥२१॥सर्वदाकम
लोपतंविचित्रपतनोचितं॥कुपदाक्रमणाख्यातंमाधरंमाधरंभजे॥२२॥इतिभार्गवचंपौषष्टस्तबकः॥ ॥अथवैकुं
ठानस्मिन्गतवतिभृगौनदाअत्यल्पकटकोपानलकीलाकलितकलुषतरांतराविप्रलब्धनिजरमणावमत्यसहमानासती
सजलनयनापांगावलोकनेनभगवन्मुखारविंदमुदीक्षंतीसांगुलिभंगंसाक्षेपमिदमवदत्॥हिजोयमुन्मथ्यइवा

जपुञ्जनिरागमसःशांतिसुखैकधाम्नः॥परात्परहृन्नवक्षसितेंधबुध्धिर्निरंकुशाविप्रजनाहिनूनं॥१॥हेकाननदेवतान्वाक्य
विपाकेनाद्यपंरंदयमनोचेद्दमितोगछामीति॥ततोब्रह्मण्यदेवोहरिः॥निगमागमखगनीडंबाडवकुलमुज्वलंममैवमुखं॥
कथमुत्सहेथकर्तुंतदहंनहिपद्मिनीहृदयिने॥२॥विप्रमोहमहाक्रांतस्त्वंनोहंत्यमपिप्रिये॥विप्रवासफलंतस्मान्ममतेथि
चनिष्ठितं॥४॥यद्यपित्वंहठादेवमामुत्सृज्यगमिष्यसि॥तेषामाशीर्वचःपाशबद्धैवपुनरेष्यसि॥४॥इत्येवंभगवद्वचनसंवे
धितामर्षधर्षितहृत्कमलाकमला॥मनोपियदितेनूनंमनोविप्रजनःप्रियः॥तत्पमन्निनेवाहंवसामितवतन्मनेः॥५॥
एवमुक्त्वासरभसंरुषावैकुंठाभिर्गत्यकरवीरक्षेत्रंभुविनिवासायरोचयामास॥ततोभगवानपितस्मात्कलहांतरितरमानुन
यार्थमाद्विराहाध्यासितमेरोश्शेलमौलिंशेषाचलमंशेनगत्वातदनुमतेननत्पच्छलान्ननिवासमकरोत्॥इतःसर्वतः
सुभगतमेवैकुंठेपित्स्वरूपानंदनिरस्तव्योमोहंप्रसरःसर्वदात्मारामःपरिपूर्णोपिरमाविरहव्याकुलीकृतमनामना
गपिश्यामलभ्रमानोमानवतींतामेवदूयमानेनमनसाचिंतयन्स्वभवनत्यागोद्यतमतिरासीत्॥प्रेमाविलमतिर्विभुंसकु
लमकलंकशीलमनुकूलं॥वर्णनीयान्न्यभुवांस्वाध्वानांसाध्वीनांसुंदरभ्रुवां॥पितुर्वापत्न्यारागारंगतिरन्यानयावहा॥
॥७॥तंनूनंक्षीरनिधेःस्वपितुरेवालयंगतेतिनिश्चित्यप्रमदासक्तचितानामेवमेवव्यवस्थितिरितिलोकान्निदर्शयन्स्वयमे
श्रीवक्षोराब्धिमुपजगाम॥तत्रापितामदृष्ट्वातिखिन्नांततयाशेषपर्यंकेक्षणंप्रत्यापद्यनावसरोभूत्॥तत्रावसरे॥दैत्योद्रोद्भव
भूरिभूपतिचमूचक्रार्दितांगामिमामादायत्रिदशाग्रिनेत्रविधयस्तीरंययुःक्षीरधेः॥लब्ध्वाग्रेविधिमद्भुतामलपदस्तो
त्रैःशनैरभ्युत्थविध्वस्तस्वपदाश्रितापदमलंभक्तेष्टदंतुष्टुवुः॥८॥ततःकृपालुर्भगवान्॥ऊर्व्यायदुकुलेसर्वेपिस्फु
पर्वाणस्तत्पत्न्यश्चांशेनसंभवंतु॥ततःसहस्रवदनाबाबामपित्रोरिनार्योरपत्यतामुपेत्यभूभारंक्षपयिष्यावः॥यो

लावण्यसरःकमलंसरलमलंकिलकलत्रमिहविरलं॥६॥ततःश्रीकांतःस्वकांताङ्कनुगतेतिवितर्कनिश्चिनोति॥

DR BHAU DAJI MEMORIAL डाक्टर भाऊदाजी इत्यादि स्मारकम्

गमायापिकार्यवशेननंदसद्मनिजनिष्यते॥इत्येवंब्रह्मणमादिदेश॥असन्निधानात्पद्मायास्तदानींजगदीश्वरः॥तज्ज
न्मकथनंनैवरुतवान्परमेष्ठिने॥९॥हरेःस्वरजिनान्नूनंभक्तदुःखंसुदुःसहं॥अतस्तदमुच्यापिश्रितत्राणार्थमुद्य
तः॥१०॥ततोदेवान्समभूक्तंनिवेद्यवसुधामाश्वास्यवेधाःस्वधामप्रत्ययपद्यत॥देवाश्चसर्वेप्रभोरादेशेतस्थुः॥शेषोपि
शौरिपत्न्योरोहिण्यामवततार॥ततः॥मायामादिश्यदृप्यद्दनुजनिकदनेचंडदोर्दंडसारःशौरेःक्षेत्रेथसाक्षात्स्वयमतुल
गुणःप्रादुरासीद्दजन्मा॥लीलाविध्वस्तकंसाद्यखिलखलमहःप्राप्यदारानुदारान्यार्थानापद्दिमुक्तानलंतपरिहरन्
भारमुर्व्यांमुरारिः॥११॥श्रीरपिभीमन्नपसुताभूत्यातद्वासयेनुरागवतीहरयेद्रुतंसमहिनोशुभकरवीरप्रियाहमिति
द्रुतं॥१२॥ततःकदाचिद्दारवत्यांविविधकामकलाकलापापकरणंलंलतकेलिसद्मनिमकरध्वजवन्हिवेगविध्वस्तधै
र्यद्रुमस्फुधामि॥वधिधायराधामंकेपर्यंकेनिःशंकंपुलकांचितांगयातयासहदिव्यंतंनिजदयितमवेक्ष्यरोषदूषितहृदय
सप्रापद्मानिश्वसंतीपुनस्तत्पद्मसंस्थज्यलोहदंडंनिर्जगाम॥अपराधेमकुप्येनमयिश्रीरिनितद्ग्यात्॥हरावनपराधे
विरुद्धातोलोहदंडभाक्॥१३॥ततःश्रितजनानिर्जरतरुःश्रीपतिरपिनद्दिरहपरिश्रांतस्वांततयाविहायस्वांतःपुरंतद
नुनयकामस्तामन्वेषयन्ननेकगिरिसरित्कांतारंप्रतिहायाविदितविगलितवसनहृद्योद्दिग्वसनएवबह्विलतांगदःश्री
वैजयंतीमालिनंकुंडलालंकृतोमार्गवपदमुद्रांकितोरःस्थलःस्वप्रियांश्रियमुपलभ्यसानंदंसांत्वयामास॥तत्रापिविफ
लानुनयश्चिरंचिंतयामास॥गृहिणीगृहमित्याहुस्तदर्थेवैतसद्मनीसाविरक्ताथकिंतेनधनेनसदनेनमे॥१४॥तदत्र
पुण्यतमेक्षेत्रेसर्वस्वव्ययेनाहमपितपश्चरामीतिनावसरे॥पितृभजनलीनमनसंमुनिवरमिहपुंडरीकनामानंस्वा
पुरोधसंनिजहृदंतस्मैनिवेद्यांचक्रे॥१५॥ततःसोपिपात्रापात्रविचारेणास्येशस्यप्रभूतवित्तव्ययःकथंस्यादितिवि

चार्यपरमकारुणिकोमनुर्ज्ञानविज्ञानहीनानांसूदानांपापिनामपात्यादिनामोक्षसुपलक्षणीकृत्यमदृतासनेति चं॰
स्वनेवसर्वस्वंप्रतिपादयेत्युपदिष्टवान्॥तिष्ठंभवेत्युक्तंमुनिनायत्रचहेतुरयमेव॥दीनाःसुदवीयांसोप्यस्यकृपालो
कगोचराःसंतु॥१५॥तद्दाग्बधःस्वमित्थामलविभवकलापालिताशेषलोकःशोकघ्नःस्वाश्रितानामनिमुदितमनाः
पुंडरीकेणदत्ते॥तिष्ठन्नूर्ध्वाष्टसिद्धिप्रदशविधिमुखावासवैकुंठसंपत्सायुज्यादिप्रदानोद्यतमतिरजितोराजतेदीनबं
धुः॥१६॥हिजेनपुंडरीकेणदर्शितेनाध्वनैवयत्॥यात्यतःपुंडरीकाक्षंमन्येहंविडलंविभुं॥१७॥नामान्यस्यहरेःश्रुतिस्मृ
तिगणैरुक्तानिगौणान्यपिप्रोद्गीतानिमहात्मभिःप्रतिपदंतिष्ठंत्यलंकोटिशः॥तत्राप्यत्रकिलादरादुपनिषद्गीतश्रवाःश्री
पतिर्दीनानामनुकंपयैवविदधौश्रीविडलेत्याह्वयं॥१७॥जघनाहितपाणिरुन्नतोसोमरुमंदस्मितसुंदरास्यचंद्रः॥
समचारुपदेक्षणशरण्यःसतुमांपातुतमोतमालनीलः॥१८॥तदारभ्यायंक्षेत्रराजोपिअघविध्वंसनस्यश्रीनिवास
स्यनिवासादघविध्वंसनःश्रीनिवासश्चाभूत्॥येमंदाःस्वकलत्रपुत्रकनकाद्यासक्तचित्ताःसदायात्रामत्रविधातुम
क्षमतयानेवागताःकर्हिचित्॥तेपिस्वोद्यमसंभमादपिबलादभ्रद्रमादूरतोप्येनंवीक्ष्ययदृच्छयापिचसकृत्प्रत्यासुरुक्त
त्मधाः॥१९॥यात्राह्ययमिहेशस्यदिवसेमासिवत्सरे॥नियमेनानुतिष्ठंतिनेःपुनर्भवभागिनः॥२०॥शुचायेप्यत्रसंगत्यशु
चितिष्ठंतिकिंचनाः॥श्रीविडलकृपालोकाविशोकाःसंभवंतिहि॥२१॥किंच॥पदजापदविच्युताजडाधःपतनीवक्रग
तिश्चजाह्नवीयंसमनाकिमुपुंडरीकनाम्नाकिलजन्हुहिजसूनुनासमेति॥२२॥अपिचमुकुंदमुचकुंदयोरहसिसं
यद्हि विदिद्योत्मणेरवाप्यमितरत्नमेवमितियच्चसिध्यतिनं॥तदत्रपदमूर्जितंसूकरेणार्जितंप्रदक्षिणविधाननःसद्यदिपुंड ॥९३॥
रीकालये॥२३॥किंपुनःक्षेत्रराजस्यप्रदक्षिणविधोफलं॥जानातिहिविधाभूमौनिपुणोपिंकश्चन॥किंच॥दशाश्वतव न

दनोप्यलंनवकुंभवतनुजामहिमानमत्रयस्यो॥स्वदृजिनपरिमार्जनायसद्यःसमभिसरंतिहिमध्यमेह्निनद्यः॥२५॥
भीमापियाविबुधजनिकमनीयातदपिनस्वरबलेयं॥स्फजडापिवेणुनादानुसरणशीलापिबल्लवीनैव॥२६॥गुर्वानार्था
भ नामपिनीचपथालंबिनानपतितेयं॥पवतनयापिभवद्गीतदपिनपितृघाति॥नीतिचित्रमिदं॥२७॥क्षेत्रेषुतीर्थेषुचदेवते
षुभक्तेषुसर्वेष्वपिकिंगरिष्टं॥श्रीपोडरीकंकथचंद्रनागाश्रीपांडुरंगोमुनिपुंडरीकः॥२८॥यदेहसंपूरितमंदहृदेवम
स्तसंदेहं॥किंकुक्षिंभरिमजनैःकिंतेत्वंतेक्षमाःपरित्रातुं॥२९॥बहवःसंतिसुमनसःस्विष्टाइहकामदाःसकामानां॥
धर्मार्थमोक्षवितरणपटुरेकोजयतिविठ्ठलोजगति॥३०॥वंदेदेवशिरोवामणिकलिमलप्रध्वंसदक्षंक्षपानाथोद्ग
सितमौलिमानसलसद्राजीबलोलंबकं॥यश्चित्रंमुनिपुंडरीकवचसाबध्योप्यविद्यागुणैर्बंधानुद्धारतेनरानपव
तोदीनानदयांबोनिधिः॥३१॥अविरतमनुकंपाकंपदीपोरुकोतिप्रशमितनतपापध्वांतपंक्तिःसमंतात्॥विधिविबु
धमुनींद्रैःसेव्यमानांघ्रिपद्मस्फजलजलदनीलंविडलंतंनतोस्मि॥३२॥आस्तामेतत्सदुपनिषदांहृद्यमाद्यंस्फविद्येरावेद्यं
यत्किमपितमसःसन्निविष्टंपरस्तात्॥अंभोदाभंसमपदकटिन्यस्तहस्तंस्मितास्यंतिष्ठद्वल्यंगदमिहमनस्याविरास्तामि
दंनः॥३३॥सांद्रेंद्रयावनीलावलिबहलरजःसंहरिश्रीजनित्रीसत्वानांस्वप्नभावाच्छितरणितिरस्कारिणीतापहंत्री॥सा
नंदंनीलकंठाघ्रिमनचरिताविट्ठलाख्यानुकंपापाथोभिस्तपर्यंतादहदिवसतिमुदेकापिकापिकादंविनीयं॥३४॥पत
व त्यतिनुरंगःकुंजकेलिप्रसंगःक्षतनेमवभंगःसन्मनःकंजभृंगः॥करविधृतरथांगःपार्वतीशांतरंगश्चविविजितपतंगः
क पातुमांपांडुरंगः॥३५॥इत्थंबोकैस्कसेमर्याल्पमतिनाचंपूरियंनिर्मितानाहीनेवनमालिनस्त्रितिपरंब्रीडाजडीभूतधीः॥
तावत्स्मृतिमागतंतवबचोयद्यत्करोषात्यहंतेनाघासरतिस्तवांघ्रिकमलोतामर्पयेत्वन्मुदे॥३६॥कथंधासोमहाक्रूवगुण त

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गणोघंगणयितुंक्षमाक्षामाक्षामीलतदनुजदर्पाहिकशिपो॥तपोभिःसंपत्पूतामितमतिपदैश्वर्यमपियद्यशःपारघा
रेरज्जुवनिमग्नंमहदपि॥३७॥नजानेहंपातंजलकपिलकाणादकमुनिप्रबंधान्साधीतंननवरदसारस्वतामपि॥तथाप्य
धाःबन्धाःपितरमिवलोकस्यनितरांगिरोमेरोमांचांचितमथभवंतंविदधतु॥३८॥नविज्ञातंज्ञेयंननवपदभक्तिर्नविर
क्तिस्तपस्यागोयोगःस्वहितमथकर्मापिनहुतं॥असत्यान्यायानांखनिरखनिभारोस्मिसदयंदयाध्येयद्युक्तंतवकुरुतदेवा
र्थिनिमयि॥३९॥गुणानामंतस्तेननिगमपुराणागमशतैस्त्वयावाविज्ञातस्त्वमसितदनंतःकिलयथा॥तथामेदोषाणामतसि
सुमसाधारणरुचेनचेद्दीनंमामुद्धरसिवदकोन्योस्तिसदयः॥४०॥पितामाताभ्रातातनुजनिरुपास्यःप्रियतमोगुरुर्भ्रा
तामित्रंसुहृदपिभवानेवभगवन्॥कृपालोदीनोयंचितिदययमामुद्धरहरेहरेमांसंसाराख्यसननतिमादर्शयपदं॥४१॥
आर्तोद्धारपरायणत्वमिहतेनैसर्गिकंतद्वान्नमांद्रुतमुद्धरिष्यतिभयादित्यस्मिमेप्रत्ययः॥कैश्चिद्भिःकिलोकलोच
नतमःशांत्यर्थमभ्यर्थितस्तेजोराशिरसौसहस्रकिरणःप्राचीमुखोतर्गतः॥४२॥भास्वत्सद्गुणभर्मणिस्त्रिजगतांपापापनु
त्कर्मणिस्वेच्छाप्रेमपरिंतशर्मणिश्रुतिमतोद्यद्धर्मबृहन्मणि॥शाश्वत्पालनधर्मणिप्रियरहःक्रीडेंदिरानर्मणिप्रज्ञाताखि
लैर्मणाहरमतांहृद्यैलब्धात्मणि॥४३॥यत्सेव्यंतदसेव्यंनासेव्यंसेव्यमितिकिमर्थनया॥इतिनिजमोघ्र्यविलज्जितबुधेर्मत
न्नसमंतुसत्कथयः॥४४॥श्रीमद्विष्णुपादपद्मविगलत्सीधूषधारारसस्वाद्यासक्तविविक्तचित्तमधुपश्रीरामसद्देशभूः॥
ख्यातख्यंबकइत्यथास्यतनयःसद्रामकृष्णाह्वयश्चंपूकाव्यमिदंचकारहहरेर्दीसोपनामाकविः॥४५॥हृद्गतेशनिदेशेन
त्वन्नीशेनापियन्मया॥कृतंयुक्तमयुक्तंवाश्रीविष्णुमुदेस्तुतत्॥४६॥इतिश्रीमद्भक्तशिखामणिश्रीरामान्वयसंभूतत्यंब ॥१४॥
कसुतरामकृष्णविरचितभार्गवचंपोसप्तमोकः समाप्तः॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥७७॥ ॥७७॥ ॥७७॥